गंशाः २९।१२ अथ दिगंशेन दिक्साधनमाह ॥ ॥समभुविति ॥ ॥समभु
वि जलवत्समी कृतायां भूमौ तुरी ९० यंत्रे त्रिकोणयंत्रे निहितस्थापिते सति द
मायंत्रे दिशः स्युः एवं स्थापिते यंत्रे पूर्वापरा स्यात् तस्मा याम्योत्तरे भवतः स
सुदृतरि गृह्याइदं कर्तव्यं ॥ ॥अथ राजसभायां स्वकौशल्य दर्शनार्थं न
लिकाबंधार्थं भुजकोटिसाधनमाह ॥ ॥क्रांतिरिति ॥ ॥यस्य ग्रहस्य न
लिकाबंधः क्रियते स ग्रह वक्ष्यमाण रिक्कर्मसंस्कृतः कार्यः तस्य वक्ष्यमाण ३९
शरसंस्कृता स्फुटा क्रांतिः कार्या ॥साइष्टकर्णेन गुण्या ॥एतद्भुजं भवति ॥ ॥

ग्रहच्छायाधिकारे प्राग्दृष्टिकरवच्चरेत्यादिना ग्रहस्य दिनगतः कालो भवति
दिनार्धोनाइत्यादिना स्फुटं वारादि दिनमानं साध्यं ॥ग्रहस्फुटकालेरु कव ल ४०
कालस्तु जसंस्कृति रित्यादिना उन्नतं परकार्यः ग्रहद्युयात् पातः शेषः प्राक्
गित्यादिना उन्नतं कार्यं ॥ ॥तस्मादुन्नतान चतिगुणितं मिष्टमुन्नत मित्या
दिना इष्टकर्णः साध्यः ॥एवं शीघ्रेष्टकर्णेन स्फुटा क्रांतिर्गुणनीया ॥अस्यो
दाहरणं ॥ ॥संवत्शके १५।७४ वैशाखशुक्ल पौर्णिमा १५ सोमे सूर्योदयात् ग्र
ह घटी गति ३१।२६ इष्टघटी भि ५७ श्चालितो रविः १।१।१९।५२ भौमः १०।
०।२९।१५ भौमस्य नालिकाबंधः क्रि-- तत्र प्रागानीतो प्रातमध्यमो रविः
१।४।१३।४२ गति ५९।८ भौमः ९।२।५५।१२ अथ स्पष्टीकरण ॥रविर्मंदकेंद्रं

ग्र.
४०

१।१२।५०।१८ मंदफलं धनं १।२८।५५ संस्कृतो रविः १।६।३८।३७ चरं रूपं संस्कृतः स्पष्टोर्कः १।६।३७।१२ भौमस्य शीघ्रकेंद्रं ॥ ३।४।४४।४८ शीघ्रफलार्धं धनं १६।५२।५८ संस्कृतो भौमः ४।२७।१८।२ मंदकेंद्रं ५।१२।४१।४ मंदफलं धनं ३२।५२।४० स्पष्टो भौमः ११।६।३७।१९ अथार्द्रकर्म साधनं ॥ तत्र क्रांतिर्दक्षिणा ११।४८।४० मंदस्य स्पष्टखगादित्यादिना क्रांतिर्दक्षिणा कुहित्यादिना कर्णः ११।४८।४० अंगुलाद्यः ११२ः दक्षिणः ३४।४१।२ भागित्रिभेण वा उनादि २३।४४।५९ अंगुलाद्यः ११२ः दक्षिणः ३४।४१।२ भागित्रिभेण वा उनादि त्यादिना रात्रिय रहितात् भौमात् ८।६।३७।२९ क्रांतिर्दक्षिणा २३।६७। २९ अक्षांशाः दक्षिणाः २४।२६।४२ अनयोः संस्कारेण जाता दक्षिणा ४९।१४।११ पहर्षेणेत्यादिना दृक्कर्म साधनं ११८।४८ संस्कृतो भौमः ४० उ.

११।८।३६।१३ अस्मात् क्रांतिर्दक्षिणा ३।१।३३ रसघटी ५७ दिनमानं २३।४०
रविभोग्यकालः ५९ लग्नं ७।१५।२३।३७ लग्नशुक्लं ३० दृक्कर्म दत्तभौमस्य भोग्यकला १८ मा ग्रहस्थितिर्कर्मखचरेत्यादिना भौमस्य दिनगतकालः ४।२९ दृक्कर्म दत्तभौमाच्चरं दक्षिणं ६ जिनाभ्रास्तनभा इत्यादिना फलं दक्षिणं ८ स्पष्टचरं दक्षिणं १४ दिनमानं २९।३२ अतिक्रांतिरुक्तवत् क्रांत्यस्तजसंस्कारादिना नतांशाः २८।२८।२५ उन्नतांशाः ६१।३१।४५ अस्मात् परारव्यः २१।१२।१४ ग्रहस्य यात्रा तल्लडकवर्धालः इत्यादिउन्नतं ४।२८ अस्मान्नवातिरगुणितमिष्टमुन्नतमित्यादिनाउन्नतं ४।२९ अस्मान्नवातिरगुणितमिष्टमुन्नतमित्यादिना दृष्टकर्णः साध्यते ॥ उन्नत ४।२९ नवत्यागुणितं ४०३।३० दिनार्धेन १४।४६ ३.

८१

ग्र· ४१

भक्तं फलं भागाः ३७।१२।३० अस्माक्रांतिः ७०।४२।३६ पराख्येन ३१।१२।१४ उ·
गुणिता २३।१५।३७ अनेन रविषट् ८४।१२ भक्ता फलं इष्टकर्णः ३०।२६ क्रांतिस्व
घ्ना क्रांतिः ३।१।३३ गुणिता ९२।५।१० अस्य कर्णः १३।१२ निघ्नी २२।३६।१५।
४८ खखाद्रि ७०० हृता जातो भुजः १।४९ क्रांतेर्दक्षिणत्वाद्दक्षिणः अयं सौ:
भुजः दक्षिणा समया ५।४९ संस्कारिता जातः स्पष्टो भुजः ७।३० तस्य भु
जवर्गः कार्यः इष्टकरणात् करणाद्वर्गविवरात्पदमित्यादिना इष्टछायाक
र्णः अस्य वर्गः कार्यः तयोर्वर्गयोरंतरालपदं मूलं सा कोटिः स्यात्॥ भुजवर्गः
५६।१५ इष्टकर्णः ३०।३६ अस्य वर्गः ९२६।११ अर्कः १२ वर्गः १४४ अनयो ४२
रंतरं मूलं जाता इष्टछाया ३७।३७।५८ छायावर्गः ७८२।८ भुजवर्गछा

भावर्गयोरंतरं ७२५।५३ अस्य मूलं जाता कोटिः २६।५६ अथ नलिकाबंध
नमाह॥ ॥शालेति॥ ॥आशां दिशं ज्ञात्वा जलवत्समीकृतभूमौ दिक्
साधनं कृत्वा तत्रेष्टकालिनछाया व्यासार्धे वृत्तं कृत्वा तत्र दिक्चिन्हानि का
र्याणि ततो बिंदोः वृत्तमध्यात् परखचरे पश्चिमकपालस्थे ग्रहे परं मुखं
पश्चिमाभिमुखं कोटिं न्यसेत् प्राक्खचरे पूर्वकपालस्थे ग्रहे प्राङ्मुखं को
न्यसेत्॥ कोट्यग्रतः स्वदिशाद्यो वत् भुजं कोट्या मध्यात्तिर्यक्प्रभां छायां
विन्यसेत् सैव कर्णः एवं जातं त्र्यस्रक्षेत्रं विधोर्भौम्यगशंकुमस्तकगतसू
त्रेण। खेरव्यं खगं विलोकयेत्॥ ॥एतदुक्तं भवति॥ छायाग्रहे द्वादशां
गुलशंकुः स्थाप्यः तस्य मस्तकस्तस्मिन् बिंदोः वृत्तमध्यात् गतं सूत्रं इ

ग्र॰ दृष्ट्याभ्यां स्थिरीकृते सूत्रगतनलेन नलिकायां यत्कालीनं दृक्कर्मादिकं कृतं त उ॰
५२ त्पर्यंतं मूलस्थदृष्ट्या खे आकाशे खगं ग्रहं विलोकयेदित्यर्थः ॥ अथ जले
ग्रहदर्शनार्थं नलिकानिवेशनमाह ॥ ॥ कृइति ॥ ॥ बिंदुस्थनरगभाग्र
गतकेन खगं विलोकयेत् ॥ ॥ तद्यथा ॥ अत्र केंद्रे शंकुः स्थाप्यः ॥ तत्केंद्र
सूत्रं छायाग्रपर्यंतं मध्येन नयेत् ॥ तत्सूत्रेण नरः स्थाप्यः तच्छायाग्रस्थाने ज
लपूर्णपात्रं स्थाप्यं ॥ तत्र नलमध्ये अधोदृष्ट्या जले ग्रहो विलोक्यः ॥ अत्रे
दं सर्वं दिक्साधननलिनिवेशनादिकं खात तस्मिन्काले विलोक्यमिति ॥
इदं यथोक्तं विचार्य कृजनस्य नृपस्य इदं जनाय दर्शयेत् ॥ उक्तं च सिद्धांत ५२
शिरोमणौ ॥ दृश्ये दिविचरं दिविके चानेहसि युचर दर्शनियोग्यं ॥ पूर्वमे

व विरच्य यथोक्तं रंजनाय कृत्स्नस्य नृपस्य ॥ ॥ इति श्री दिवाकरात्म
ज विश्वनाथ विरचिते ग्रहलाघवोदाहरणे नलिकाबंधाधिकारोदाहृतिः
४ ॥ ॥ अथ चंद्रग्रहणाधिकार उदाहरणं ॥ ॥ तत्रादौ ग्रहाणां तात्का
लिकीकरणं ॥ ॥ गतेगम्येति ॥ १ ॥ यस्मिन्दिने ग्रहस्य साधनं कृतं तस्मा
द्दिवसात् गतगम्याः ये दिवसाः तैः आहता गुणिता द्युभुक्तिः ग्रहभुक्तिः त
त्सकाशात् खरसैः षष्ट्या आप्ता ॥ लब्धा ये अंशाः ॥ तैः वियुक्तो रहितः युक्तो यु
क्तः ग्रहः कार्यः ॥ गताश्चेद्दिवसास्तदा रहितः कार्यः गम्याश्चेद्दिवसास्तदा स
हितः कार्यः ॥ स ग्रहस्तात्कालिकः तद्दिने आग्रहः स्यात् ॥ तथा गतगम्यघ
टिकाः गतैः सकाशात् खरसैः लब्धकलाभिः ऊनः युक्तः कार्यः ॥ ग्रहः तात्का

ग्र. लिकः स्यादित्यर्थः ॥ अत्र एतावान्विशेषः चंद्रसूर्यग्रहणे ॥ ॥ पूर्णिमातथा ७.
अमावास्यायां यावत्परिमिताः संतिताभिः घटिकाभिः मध्यमाः रविचंद्रौ चंद्रो
च्चराहवश्चाल्याः ॥ तदनंतरं स्पष्टीकरणं कार्यं ॥ ततः रविचंद्राभ्यां तिथेः घ
टिकाः साध्याः ताः पंचांगस्थघटीमध्ये युक्ताः कार्याः रहिताश्च कार्याः ॥ त
द्यथा ॥ यदा चतुर्दशी एकोनत्रिंशद्वा गततिथिः यातितदा वर्तमाना पूर्णि
मा ॥ अमावास्या ॥ यावा एष्य घटिकाः साध्याः ताः पंचांगस्थपर्वघटीमध्ये
युक्ताः कार्याः यदा पंचदशा तुल्या त्रिंशत्तुल्या वा गततिथिः आयाति तदा
वर्तमानमासिपक्षतिथेः गतघटिकाः साध्यः पंचांगस्थघटिकामध्ये रहिताः
कार्याः स पर्वांतकालो भवति ॥ एवं यातगतगम्या घटिकाः आगताः ताभिः

८६

८८

ग्रहाणां चालनं देयं पर्वांतकालिका भवंति ॥ उदाहरणं ॥ संवत् ॥ १८७७ शाके १७
४२ मार्गशीर्षशुक्ल १५ बुधे घ ३८ प ११ रोहिणीनक्षत्र घ ९ प २ साध्ययोग घ
७ प ३५ अत्र चंद्रपर्व साधनार्थमहर्गणः ॥ चक्रं ९ अहर्गणः ६३६ अस्मात्सा
धिताः मासमध्यमाः रविः ८।०।८।५९ चंद्रः ११।२५।५८।५० चंद्रोच्चं ७।१।३७
४ राहुः ७।२८।२५।३७ तिथिघटिभिः ३८।११ चालिताः रविः ८।०।४६।३६
चंद्रः २।३।४३।४ उच्चं ७।१३।४९।२ राहुः ७।१८।२३।२६ अथ स्पष्टीकरणं ॥
रवेः मंदकेंद्रं ६।७।१३।२४ मंदफलं ऋणं ०।१३।९।३० मंदफलसंस्कृतो रविः
८।०।७।३२ अयनांशाः १८।१८ चरं धनं ११४ चरसंस्कृतः जातः स्पष्टो
र्कः ८।०।९।२६ गतिफलं धनं २।३ स्पष्टगतिः ६१।११ फलत्रयसंस्कृतश्च

८७

ग्र· द्र: ३२।३।४६।१० मंदकेंद्रं ७।२९।४०।२ मंदफलं ऋणं ४।२०।१२ संस्कृतश्च ७·
४४ द्र: १।२९।३६।६ गतिफलं धनं ३३।१५ स्पष्टगतिः ८।२३।४० आर्क्यागत
तिथिः १४ एष्य घ २ प ३७ आभिः पंचांगस्थ घटिकाः शुद्धाः ३८।११ आ
गतः पर्वांतकालः ४०।४८ आभिः एष्य घटीभिः २।३७ चालिताः जाताः
पर्वांतकालिकाः रविः ८।०।१२।६ चंद्रः २।०।१३।१ राहुः ७।२८।३३।१८ अ
थ ग्रहणसंभवज्ञानं शरसाधनं चाह॥ ॥ एवं पर्वांते इति॥ एवं पूर्वोक्तप्र
कारेण चालितौ चंद्रार्कौ पर्वांते पाणिमांते षड्राध्यंतरे अंशाः कला समेतो भवतः
अमांते राध्यंतते कला समेतो भवतः॥ उक्तं च शिरोमणौ॥ पूर्णांतका
लेषु समौ लवाद्यैर्दर्शांतकाले ऽपि यथैव ग्रहौ इति अत्र पर्वशब्दः पूर्णिमा ४४

मावास्या वाचकः॥ तत्र विराहुर्कबाहोलवाः कार्याः। विगतो राहुः यस्मात् स
विराहुः स चासौ अर्कश्च विराहुर्कः॥ राहुः अर्कात् शोध्य इत्यर्थः॥ अस्य भुजः का
र्यः भुजस्य अंशाः कार्याः॥ ते अंशाश्च इंद्रा १४ ख्याश्चतुर्दशेभ्यो अल्पास्तदा ग्र
हस्य संभवः स्यात्॥ तदा ग्रहणं भविष्यतीत्यर्थः॥ एवं चंद्रग्रहणे॥ सूर्यग्रहेतु
उत्तरगोले भुजांशाः इंद्राख्याः दक्षिणगोले अष्टभ्यो न्यूनास्तदा अर्कग्रहणं भ
विष्यतीति ज्ञेयं॥ इदं लक्षणं सूर्यग्रहणे दक्षिणगोले व्यभिचार इत्यग्रे वक्ष्य
ति॥ ते अंशाः त्र्यंकरैः एकादशभिः निघ्नाः गुणिताः॥ शैलभक्ताः सप्तभक्ताः
फलं अंगुलानि शेषं षष्टि ६० गुणं सप्तभक्तं फलं व्यंगुलानि एवं अंगुलादि
व्यग्वर्काशाः व्यग्वर्कस्य आशा दिक् यस्य सः विराहुर्कः यस्मिन् गोले वर्तते

ग्र· ४९ तद्दिक्पृषत्कः शरः स्यात् ॥ उदाहरणं ॥ रविः ८।०।१२।६ राहुः ७।८।२३।३८ वि उ·
राहुर्कः ०।११।४८।४८ अस्य भुजांशाः ११।४८।४८ चतुर्दशेभ्यो न्यूनाः अतो ग्रहण
संभवः विराहुर्कभुजांशाः शंकरैः ११ गुणिताः १२९।५६।४८ सप्तभक्ताः फलमंगु
लादिशरः २।५० विराहुर्कस्य उत्तरगोलस्थत्वात् शरः उत्तरः अथ सूर्यचंद्र
बिंबानयनं भूभासाधनमाह ॥ ॥ गतिरिति ॥ ॥ स्वरूपः सूर्यस्य गतिः ६१
११ द्विगुणिता १२२।२२ एकादशभक्ता फलमंगुलाद्यातनुः सूर्यबिंबं स्यात् ।
विधोर्भुक्तिः ८।२३।५० वेदाद्रिभिः ७४ भक्ता फलमंगुलाद्यं चंद्रबिंबं ११।७
चांद्री गतिः चंद्रस्येयं चांद्री ८।२३।५० नृपाभ्यो नत ७९७।५० लोचनकरैः २२ ५
भक्ता फलं ४।५४ द्वात्रिंशाद्भिः युक्तं ३२।३६।५४ सूर्यगतिः ६१।११ अस्याः

नगांशाः ८।४४ अनेन रहिता रदाब्जाता भूभा स्यात् ॥ २८।१० इदमेव राहुबिं
बं ॥ अथ मानैक्यखंडं ग्रासाद्यानयनमाह ॥ ॥ छादयतीति ॥ ॥ सूर्यग्रहे इंदुश्चं
द्रः अर्कमाच्छादयति ॥ चंद्रग्रहे विधुं भूमिभा चंद्रमसं भूभा आच्छादयति लो
केतु राहुकृतं ग्रहणमिति ॥ चंद्रग्रहे ॥ अत्र ब्रह्मणो वरप्रदानात् ॥ उक्तं च सिद्धां
तशिरोमणौ ॥ राहुः कुभामंडलगः शशांकं शशांकगश्छादयतीनबिंबं ॥
तमोमयः शंभुवरप्रदानात् ॥ सर्वागमानामविरुद्धमेतत् ॥ १ ॥ भो गणक छाद
कच्छाद्यमानैक्यखंडं कुरु ॥ छादयतीयः स छादकः । छादयितुं योग्यं छाद्यः ॥
छादकश्चाच्छाद्यश्च छादकच्छाद्यौ तयोः बिंबयोः मानैक्ययोरैक्यं तस्य खंडं
अर्ककार्यमित्यर्थः ॥ चंद्रग्रहे छादको भूभा छाद्यश्चंद्रः तयोः बिंबयोगार्धं

ग्र. नचंद्रग्रहे मानैक्यखंडं स्यात्॥ रविग्रहे छादकश्चंद्रः छाद्यो रविः॥ तयोर्बिं उ.
५६ बयोगार्धं तत्सूर्यग्रहे मानैक्यखंडं तन्मानैक्यखंडं पूर्वोक्तेन अंगुलाद्येन शा
रेणाऊनेरहितं कार्यं॥ यदवसिष्टं तत् छन्नांगुलाद्यो ग्रासः स्यात्॥ यदा मानै
क्यखंडं अल्परोनबध्यात्ति तदा ग्रहणं नास्ति स्यर्थासिद्धं॥ एतत् छन्नं ग्राह्यबिंबेन ही
नं कृत्वा अवसिष्टं यत्तत् खछन्नं स्यात्॥ तस्मिन् खग्रासो भवतीत्यर्थः॥ चं
द्रग्रहे ग्राह्यं चंद्रबिंबं सूर्यग्रहे सूर्यबिंबमिति॥ ॥उदाहरणं छादकः भूभा २९
४० छाद्ये चंद्रबिंबं ११।७ अनयोः ऐक्यं ३०।१७ अस्यार्धं मानं। मानैक्यखंडं
१५।३८ शरेण २।५० रहितं जातो ग्रासः १२।४८ ग्रासाद्बिंबे ११।७ न छन्नं रहि
तं जातः खग्रासः १।४१ अथ स्थितिमर्दघटिकानयनमाह॥ ॥मानैक्येति ५६

मानैक्यखंडं १२।३८ इषुणा शरेण २।५० सहितं २२।२८ दशघ्नं २२४।४०
छन्नेन १२।४८ गुणितं ३१।७४।२४ इदं वारद्वयं षष्ट्यासवर्णितं १०५७७७
४० अस्य मूलं ६१।२६ इदं खषडंशेन ७।२४ हीनं ५१।१२ ग्लौबिंबेन भक्तं
११७ फलं जाता घटिकादिका स्थितिः॥ ४।३६ तनुदलांतरखग्रहाभ्यां तथा
स्थितिवत् मर्दं साध्यं॥ एतदुक्तं भवति॥ तन्वोः बिंबयोः दलेखंडे तयोः अंतरं
कार्यं॥ चंद्रग्रहे चंद्रभूभाबिंबदलांतरं सूर्ये चंद्रबिंबदलांतरमित्यर्थः॥ खग्र
हः खग्रासः ताभ्यामित्यर्थः॥ अत्रोदाहरणं चंद्रबिंबं ११।३ भूभाबिंबं २९।४०
चंद्रबिंबदलं ५।३१ भूभाबिंबदले १४।५ अनयोः अंतरं ९।३४ इषुणा २।५०।
सहितं ११।२४ दशघ्नं ११३।४० खग्रासेन ५।४१ गुणितं ६४।६।० इदं वारद्वय

ग्र. षष्ठ्यासवर्णितं २३२५६० अस्य मूलं २५।२४ इदं षडंशेन ४।१४ हीनं २१।१० ग.
७ चंद्रबिंबेन भक्तं ७।७ भक्तं घटिकादिकं मर्द १।५४ अथ स्पर्शमोक्षस्थितिमर्द
नयनमाह॥ ॥युग्मेति॥ व्यगोः ये भुजांशाः ते द्विगुणिताः कार्याः॥ तत्तुल्यैः
सा पूर्वोक्ता द्विष्ठा स्थितिः ४ सरहिता सहिता कार्या॥ कल्मिन्नात्ति॥ अर्कषड
भात् ऊने व्यगौ सति। द्वादशराशिभ्यः षड्राशिभ्यः ऊने व्यगौ सतीत्यर्थः॥ अ
धिका द्वितरथा अन्यथा कार्ये सहिता रहिता चेति॥ अर्कषड्भात् ऊने व्यगौ इत्य
त्र चतुर्दशांशैः ऊनाधिका ज्ञेया तद्यथा॥ विराहुर्कस्य एकादशराशयः षोड
शांशमारभ्य शून्यराश्या द्यवयवपर्यंतं द्वादशराशिभ्यः ऊनो ज्ञेयः॥ शून्य ७
राशिः एकविकलामारभ्य चतुर्दशांशपर्यंतं सद्वादशाधिको ज्ञेयः॥ एवं पंचरा

शिषोडशांशमारभ्य षड्राशिपर्यंतं षड्भात् न्यूनो ज्ञेयः। षड्राशिमारभ्य चतुर्दशां
शपर्यंतं षड्भाधिको ज्ञेयः॥ अत्रोदाहरणं॥ ॥ घटिकादिस्थितिः ४।३६ विर
हिता जाता मोक्षस्थितिः ४।३२ मर्द १।५४ युग्माद्दलैः व्यग्रभुजांशास्तैः पलैः
३ सहितं जातं स्पर्शमर्द ७।५७ रहितं जातं मोक्षमर्द १।५१॥ ॥ अथ मध्यग्रह
णस्पर्शमोक्षकालसन्मीलनोन्मीलनकालसाधनमाह॥ ॥ तिथिविरतिरिति॥
तिथेः गणितागतायाः विरतिः अंतः अयं ग्रहस्य ग्रहणस्य मध्यः मध्यकालो
भवति॥ यः आगतो ग्रासः तस्य ग्रासनं यत्सन्मध्यग्रहणं समध्यग्रहणकालो नि
जस्थितिभ्यां स्पर्शमोक्षस्थितिभ्यां रहितः सहितः स्पर्शस्थित्या रहितः मोक्षस्
स्थित्या सहितः ग्रहणमुखविरामयोः ग्रहणमुखे स्पर्शः विरामो मोक्षस्तयोः

ग्र ४८ कलेऽस्तः॥ स्पर्शो ग्रासस्य आरंभः मोक्षो ग्रासाभावः॥ अनेन प्रकारेण मर्दकाख्या उ.
पिहितापिहितेस्पष्टं॥ मध्यग्रहणकालः स्पर्शमोक्षमर्दाभ्यां रहितः सहितः क्र
मेणपिहितापिहितेस्तः॥ सन्मीलनोन्मीलने स्त इत्यर्थः॥ उदाहरणं॥ ॥तिथि
विरतिः ग्रहणमध्यः ४०।४८ स्पर्शस्थित्या ४।३९ रहितो जातो स्पर्शकालः
३६।९ मोक्षस्थित्या युक्तो ४।३३ जातो मोक्षकालः ४५।२१ तिथिविरतिः ४०।४८
स्पर्शमर्देन १।५७ रहिता जाता सन्मीलनकालः ३८।५१ मोक्षमर्देन १।५१ सहि
ता जातो उन्मीलनकालः ४२।३९ अथेष्टग्रासानयनमाह॥ ॥पिहितेति॥
पिहितेन ग्रासेन हतं गुणितं यत् इष्टं घटिकात्मकं स्वस्थिते र्यथान्यूनं तथा ४८
इष्टं कल्पनीयं तत्स्वस्थित्या विहृतं कार्यं चेत् स्पर्शकालीनमिष्टं तदा स्पर्शस्थि

त्या भाज्यं मोक्षकालीनमिष्टं चेत्तदा मोक्षस्थित्या भाज्यमिति तत्। कृतं सच
रणभुवा सपादरूपेण १।१५ युतं अभीष्टग्रसनं इष्टग्रासो भवति॥ स्पर्शमध्येय
दिष्टं तत्स्पर्शेष्टं मोक्षात्प्रागिष्टं मोक्षेष्टं इति ध्येयं॥ ॥उदाहरणं॥ ॥स्पर्शानंत
रं कल्पितमिष्टं घटिकाद्वयं २ ग्रासेन १६।४५ गुणितं ३३।३६ स्पर्शस्थित्या ४।
३९ विहृतं ७।१२ सचरणभुवा १।१५ युक्तं जातं अभीष्टग्रसनं ८।२८॥ ॥अ
थवलनसाधनमाह॥ ॥त्रिभइति ॥ स्वविधुग्रहे त्रिभयुतान रविः कार्यः
सूर्यग्रहे रविस्त्रिभयुतः कार्यः। चंद्रग्रहे रविः त्रिभोनः कार्यः स अयनवला
ख्यः। अयनांशैर्युक्तः कार्यः युतः अस्मात् नगशरेंदुमितैः दलैः खंडकेष्वर
साधनोक्तवत्। अयनवलनं भवेत् स्वरविदिशि त्रिभयुतोनः कार्यः सायनो

ग्र· यस्मिन् गोलेस्ति ॥ तद्दिगित्यर्थः ॥ उदाहरणं ॥ रविः ८।०।१२।६ चंद्रग्रहणस्य उ·
४९ विद्यमानत्वात् त्रिभोनः कार्यः ५।०।१२।६ अयनांश १८।१८ युक्तः २।१८।
३०।६ अस्य भुजः ०।११।२५।५४ भुजराशिस्थाने शून्यमस्ति अतो नगशरेंदुमितं
खंडं अनेन भ्रामलशेषं १५।२५।५४ भोग्यखंडकेन ७ गुणितं ८।०।२५।८ त्रिंश
३० द्धृतं फलं ९।४० अनेन युक्तो गतखंडयोगो जातं वलनं २।४० त्रिभोनसाय
नरवेः उत्तरगोलस्थत्वात् उत्तरं ॥ अथ द्वितीयं वलनं तत्संस्कृतिं लद्धीश्वाह
विषयेति ॥ तत्रमध्यकालीननतसाधनं यथा पर्वांतकालिनचंद्रमध्ये पर्वांत
कालीनः राहुः शोध्यः एवं व्यगुविधुः कार्याः तस्य भुजांशाः कार्याः अस्मात्त्रि ४९
शाः निघ्नाः शंकोरित्यादिना शरः साध्यः वक्ष्यमाण प्राक् त्रिभोनवर्जितात्

इत्यादिना दृक्कर्मलवाः कार्याः एवं दृक्कर्मसंस्कृतश्चंद्रः कार्याः पर्वांतकालिन
सूर्यात् लग्नं साध्यं वक्ष्यमाणग्रहछायाधिकारोक्त भागदृष्टिखचरैरित्यादिना
चंद्रस्य दिगतकालः साध्यः ॥ दृक्कर्मसंस्कृतात् चंद्रात् चरं साध्यं वक्ष्यमाणाज्जि
नाभोस्त्रभा इत्यादिना स्पष्टचरं कार्यं । स्पष्टचरादिनार्धं साध्यं तत् चंद्रस्य दि
नार्धं भवति ॥ द्युगतदिनार्धयोरंतरात् नतं कार्यं ॥ अस्योदाहरणं ॥ चंद्रः
२।०।१२ राहुः ७।२८।२३।२८ व्यगुविधुः ६।१।४८।४६ अस्य भुजांशाः १।४
४३ शरः दक्षिणः २।५० राशित्रयरहितचंद्रः ११।८।१२।१ अस्मात् क्रांतिर्दक्षि
णा ॥ ४।३५।५६ अक्षांशाः दक्षिणाः २५।२६।४२ अनयोः संस्कारेण जातान
तांशा दक्षिणाः ३०।२।४० अस्माद्दृक्कर्मलवाः धनं ४।५८ संस्कृतश्चंद्रः २।०
१६।४८

ग्र॰ दिनमानं २५।१२ पर्वांतकालः ४०।४८ सूर्यास्ताद्गतघटिकाः १४।३६ पर्वांतका उ॰
५० लीनः सूर्यः ८।०।१२।६ भोग्यकालः ११६ लग्नं ४।१८।१४।१४ दृक्कर्मसंस्कृ
तचंद्रस्य भोग्यकालः १५५ लग्नस्य भुक्तकालः ७३ अनयोर्योगः १८८ कर्क
कै ३४२ सिंह ३४५ उदयाभ्यां युतः ८७५ षष्टिघ्नः भक्तः १४।३५।२४ नवभिः
पलैः ९ रहितश्चंद्रोदयात् चंद्रस्य दिनगतकालः १४।२६ दृक्कर्मसंस्कृतचं
द्राद्वर्ष्टउत्तरं घटिका ५।१।५४ अंगुलमितशरः २।५० अक्षभाभः १६।७७।
जिनाप्तः फलं कलात्मकं दक्षिणं ०।४० शरस्य दक्षिणत्वात् अनेन संस्कृता
श्चंद्रघटिकाः जाताः स्पष्टचरघटिकाः उत्तराः १।५७।२० आभिः पंचदश घ ५०
टिकायुक्ताः जाते चंद्रस्य दिनार्धं ॥ अत्र कर्मजात्यत्वात् च यत् सूर्यस्य रात्र्यर्धं

तच्चंद्रस्य दिनार्धमिति ज्ञेयं ॥ इदं चंद्रस्य दिनगतकालेन ४।२६ रहितं जातं पूर्वन
तं २।३७ धुगतं दिनार्धाद्धनं धनत्वात् पूर्वनतं विपरीतत्वे धने पश्चिमनतं भवति ॥ अ
यं चंद्रग्रहणे पर्वांतकालिन नतसाधने मुख्यः प्रकारः ॥ अथवा सूर्यास्तात् पर्वांत
काल सूर्यरात्रिदलयोः अंतरं विवरं कार्यं तन्नतं भवति ॥ यत् सूर्यस्य रात्रिदलं
तदेव चंद्रस्य दिनार्धं ॥ तन्नतं दिनार्धादुपरि रात्र्यर्धपर्यंतं पूर्वं रात्र्यर्धात् उप
रि दिनार्धपर्यंतं पश्चिमनतं ॥ इदं पूर्वपश्चिमलक्षणं सूर्यग्रहणे विपरीतं ज्ञेयं ॥
उक्तं च ॥ अहर्दलाद्रात्रिदलावसाने यावत् कपालं कथयंति पूर्वं ॥ ततो दिनार्धां
तिम पूर्वमिंदोर्भानोर्भवेत्तां ग्रहणे न्यथात्वे ॥१॥ एवं जातं मध्यनतं २।३७ इदं विष
यैः भक्तं फलं राशयः ० । शेषं २।३७ त्रिंशद्गुणो जातः षष्टि ७८ भक्तं पलैनोर्धं युतं

ग्र० जातं ७३।३० पुनर्विषयैः ५भक्तं फलं भागाः १४ शेषं ३।३० षष्टिघ्नं पंचभिर्भक्तं उ०
५१ फलं कलाः ४२ शेषं षष्टिघ्नं विषयैः भक्तं फलं विकलाः ०। एवं जातं ग्रहहारः ०।१४
४२।० अथ उक्तवत् भुजसंख्य चरार्धयोग इत्यादिना नगशरेंदुमितैः चरदलैः
वलनं कार्यं॥ अत्र अयनांश संस्कारो नास्ति॥ तत् पलभा दलं अक्षैः पंचाभिः ५भ
क्तं तत् नतं उदक् ऊन प्राक् भवति॥ कस्मिन्नति॥ क्रमात् पूर्वं परे नते उत्तरं वलनं पश्चि
मनते दक्षिणं स्यादित्यर्थः॥ उभयोर्वलनयोः संस्कृतिः समदिशि योगो भिन्नदिशि
अंतरं सा संस्कृतिः रसहृता षड्भक्ता अंग्रयो वलनां ग्रयः स्युः मध्यनतात् वि
षय लब्धिं ग्रहहारः ०।१४।४२।० अस्माद्वलनं ३।२५।४० पलभाया ५।४५ गुणि ५१
तं १२।४२ पंचभक्तं जातं वलनं उत्तरं ३।५६ पूर्वं न तस्य विद्यमानत्वाद्वलनमु

त्तरं। २।४० उभयोः संस्कृतिः ६।३६ रस६भक्ता जाता वलनांग्रयः उत्तराः १।६
अथ ग्रस्तोदित ग्रस्तास्त वलन साधनार्थं ज्ञानमाह॥ ॥स्पर्शादिकं मिति॥ ॥
दिवसस्य शेषे विधोः स्पर्शादिकं यदि स्यात्॥ अथवा दिवसस्य याते गते सति आदि
शब्दात् मध्य ग्रहणमोक्षौ दिवसस्य शेषे ग्रहस्थेंद्रः उदेति प्रातः ग्रस्तास्तमेति यत्
घटीभिः दिवसस्य शेषेण गते स्पर्शादिकं तदा द्युदल तद्विवरं कार्यं॥ द्युदलं सूर्य
स्यादिनार्धं तत् घटिकादिकं तयोः अंतरं कार्यं इत्यर्थः॥ प्राक् पश्चिमे नतं स्यात्
दिनशेषे प्राक् नतं गते पश्चिमनतं॥ एवं रात्रिशेषे गते वा स्पर्शादिकं भवति॥
रात्रिशेषे ग्रस्तोदितो भवति॥ रात्रिगते ग्रस्तास्तमिति। रात्रिशेषे तु वा यावता
घटिकाद्येन अवयवेन स्पर्शादिकं न घं तावता ऊनितं निशाशकलं प्राक् परं न

ग्र. तं स्यात् ॥ वलनस्य सिध्ये वलनसाधनार्थमित्यर्थः ॥ एतच्छरस्पर्शव्यतिरिक्ते स उ.
५२ र्शादिकं तरा ॥ यातः शेषः प्राक्पर त्रैसिन तत्कार्यं इत्यर्थः ॥ अथ छन्नस्य छन्नच
रणानाह ॥ ॥ मानैक्यार्धेति ॥ ॥ खषड्भापिहिताषष्टिगुणितग्रासात्मा
नैक्यार्धेन हृतात् ॥ तस्मान्मूलं तस्य छन्नस्य आशाप्रयोदिग्ध्रुयः स्युः ॥ अथ
खछन्नं चेन्न रात तत्सदृत्ते कथक्रूसार्धरूपयुक्तं खच्छन्नजांशोप्रयोगादिता उक्ता
इति ॥ अत्रोदाहरणं ॥ ॥ ग्रासः १६।१८ षष्टिगुणितः ९८० मानैक्यखंडेन
१२।३८ भक्तं फलं ५१।२० अस्य मूलं जाताङ्गुल्यांशप्रयः ७।१६ खछन्नं ५।७ सद
त्ते कृ १।३७ युक्तः खग्रासांशप्रयः ७।११ अथ मध्यग्रहणादिकज्ञानं श्लोकार्ध ५२
नाह ॥ सव्यासव्यमिति ॥ इष्टवृत्तं कार्यं तद्दिग्ङ्कितं तत्र शरा शायाः शरदिशः

अपाकू उदकू वलनजाशांशान् सव्यासव्यं प्रदद्यात् ॥ तत्र एकैकदिग्मध्ये चत्वा
रोंशये यैस्यः वलनांशप्रयो अपाक्दक्षिणाश्चेत्तदा शरदिशः सकाशात् क्रमेण
सव्यं सव्यक्रमेण देयाः उदक् उत्तराश्चेत्तदा शरदिशः असव्यं अपसव्यं देयाः
तत्र चिन्हं कार्यं तत्र दिशि मध्यः मध्यग्रहणं स्यात् ॥ अन्यदिशि मध्यग्रहण
सक्षुरवानूयदिदिशि सग्रासः ॥ वाशेषं ग्रहणशेषं ज्ञेयं ॥ अथ स्पर्शमोक्षस
न्मीलनोन्मीलनज्ञानं चाह ॥ ॥ मध्यादिति ॥ ॥ मध्यान्मध्यग्रहणादितः प्रा
कपश्चात् र ˜नैः छन्नांशांशाभिः इंद्रोः स्पर्शमोक्षौ स्तः ॥ मध्यग्रहणात्प्राक्
पूर्वदत्तैः स्पर्शः ॥ पश्चाद्दत्तैर्मोक्ष इत्यर्थः ॥ उडुगोः सूर्यस्य व्यस्तं विपरीतं ॥
प्राक्दत्तेषु छन्नांशेषु मोक्षः पश्चाद्दत्तेषु छन्नं पादैः मीलनोन्मीलने स्तः ॥

ग्र· ५२ स्पर्शइत्यर्थः॥ खग्रासादिति॥ यादिशि खग्रासः तद्दिशः सकाशात्परेभाद्रूदले खस्तंत्रे पादैः मीलनोन्मीलने स्तः॥ खग्रासात् पश्चार्द्धदले सन्मीलनं पूर्वदलेः उ·
न्मीलनं अस्माद्व्यैः विपरीतं॥ पूर्वदले सन्मीलनं पश्चादुन्मीलनं॥ अत्रा चार्येण
नोक्तं सूर्यग्रहणे खग्रासः कदाचिद्भविष्यतीत्यर्थः॥ ॥इतिचंद्रग्रहणाधिक
रः॥ ॥अथसूर्यग्रहणाधिकारस्योदाहरणं॥ ॥संवत् १८६७ शाके १७३२
मार्गशीर्षकृष्ण ३० बुधे घटिका १२।३६ मूलनक्षत्रघ ५१।५२ गंडयोग घटी
२३।४५ अस्मिन्दिने सूर्यपर्वविलोकनार्थमहर्गणः क्रियते ताचंचक्रे घ ८
अधिमासा १ अवमानि १५ अहर्गणः ४०१५ प्रातर्मध्यमाः सूर्यः ७।१५।३८
२५ चंद्रः ७।१।४।३९ उच्चं ०।७।३।२१ राहुः २।११।४।१९ आभिः घटीभि ५२
१२।३६

चालिताः मध्यमाः रविः ७।१५।५१।५० चंद्रः ७।३।३६।३४ उच्चं ०।७।२८।४९
राहुः २।११।४।१ अस्यस्पष्टीकरणं॥ ॥तत्ररवेः मंदकेंद्रं ६।१२।८।४ मंद
फलंऋणं ०।३७।५० संस्कृतोरविः ७।१५।२४।० अयनांशाः १९।८ चरपंडा
नि ७।४६।१९ चरंधनं ५७ अनेनसंस्कृतः जातः स्पष्टोरविः ७।१५।२५।५७
स्पष्टगतिः ६१।१५ फलत्रयसंस्कृतश्चंद्रः ७।४।४।५२ चंद्रस्यग्रहणोत्पाद्यपरिधिः
मंदकेंद्रं ०।१३।७।५२ मंदफलंधनं ०।१७।४८ संस्कृतो
जातः स्पष्टश्चंद्रः ७।१५।२०।४ स्पष्टागतिः ७२६ स्पष्टा
गतिः ७२६।३० आभ्यांतिथिघटी ०।२८ पंचांगस्थ घ
टिका १२।३६ युक्ताः जातः पर्वांतकालः १३।४ आभिः
घटिकाभिः ०।२८ चालिताः जाताः पर्वांतकालिना ः

ग्र· सूर्यः ८।५।२६।२९ चंद्रः ८।५।२६।२० राहुः ३।११।४३।१८ विराहुर्कः ५।२३।४५ उ·
५४ ७ अथ लंबनसाधनं श्लोकद्वयेनाह॥ ॥लग्नमिति॥ ॥सार्कोहार इति॥
दर्शांते लग्नं साध्यं तत्र रवेः भोग्यकालः ७२ दर्शांतः १३।४ लग्नं ११।२।४६।१७
राशित्रयरहितं ८।२।४६।१७ इदं त्रिभं ८।२।४६।१७ अस्य स्पः स्वदेशानीत्यादि
नाक्रांतिर्दक्षिणा २३।३८।१५ अक्षांशाः दक्षिणाः २५।२६।४२ अनयोः एक
दिशि योगः जातानतांशाः ४५।४।४२ एष दृग्ज्यांशाः २२।२।१३।४३ वर्गितः
४।५४ अयं द्वाभ्यां अधिकः अतो हि स्वः ४।५८ द्वाभ्यां न्यूनः २।५८ आर्धि
तः १।२९ अनेन युतो हि स्वः ६।२७ सार्कोजातो हारः १८।३७ वर्गश्च द्वाभ्यां ५४
ऊनः तदा सवर्गः सार्को हारः स्यात्॥ यदि दर्शांतलग्नं राशित्रयोनं ततः दर्शां

तलग्नस्य राशिस्थाने द्वादशराशयो योज्याः॥ तदनंतरं राशित्रयं पोनं का
र्यं॥ अत्र त्रिभोनलग्नार्कयोः अंतरं तथा राशित्रयात्समं भवति तथा कार्यं॥
अनयोर्मध्ये यः शोध्यते स न्यूनो ज्ञेयः॥ अंतरं॥ अन्यदाधिक इत्यर्थः॥
सिद्धं इदं धनर्णता ज्ञानार्थमुक्तं॥ अत्र कल्पितं त्रिभोनलग्नं १९ अर्कः अन
योः अंतरं २ अस्मा लंबनं ऋणं ज्ञेयं अर्कतः त्रिभोनलग्नस्य न्यूनत्वात् त्रि
भोनलग्नं ८।२।४६।१७ अर्कः ८।५।२६।२५ अनयोर्विश्लेषः ०।२।४०।८
एषां दशमांशः ०।१६ भक्ताः फलं घटिका घलंबनं ऋणं ०।११।४ शाकाः १४
दशमांशेन हीनः १३।४४ एवं दशमांशेन युगणितः ०।३० हारेण १८।३७
हि त्रिभार्कस्य न्यूनत्वात् तिथ्यां तिथिघटीकासु वर्जनीकार्यं॥ कस्मिन्नाति॥

ग्र. विक्षिप्ते अर्काद्धधिकोनेसति॥ त्रिभोनलग्ने अर्कात् आधिके स्वंधनंका उ.
५५ र्यं॥ ऊनेऋणंकार्यं॥ तस्मिन् तिथ्यंते मध्यमग्रहणंभवति॥ लंबनसं
स्कृततिथ्यंतः॥ १२।५३ अथव्यगोः लंबनसंस्कारमाह॥ ॥त्रिकु
निघ्नाति॥ विलंबनं० ।११ त्रयोदशगुणितं जातं कलाद्यं २।२३ व्यगुः
११।२३।४५।७ लंबनस्यतिथौ ऋणत्वात् व्यगावपि ऋणत्वं॥ लंबनसं
स्कृतेव्यगुः ५।२३।४२ अस्यभुजांशाः ५।७।१६ अस्मात् अंशानिघ्ना
दस्याद्विनाजातःशरः ७।५२ विरवर्कस्य उत्तरगोलस्थत्वात् उत्तरंव
लनं०।११ षड्गुणं जातं लवाद्यं १।६।० अस्यक्रांति॥ पृथक्त्रिभोन ५५
लग्ने॥ २।४६।१ लंबनस्यऋणत्वं लवाद्येनहीनं ८।११।४०।१७ अ

स्यक्रांतिर्दक्षिणा २३।३४।३५ अक्षांशाः संस्कृताजाता नतांशादक्षि
णाः ४५।१।१७ अथनतिसाधनमाह॥ ॥दशाहतेति॥ नतभागाः
दशभक्ताः ४।५९ अष्टेंद्रवः १८ दशभक्तफलेन हीनः १३।६ एते दश
भक्तफलेनैव गुणिताः कलाजाताः ६४।११ एताः पृथक्स्थाः ६४।११
तद्रहितसप्ततिलिप्तैः षड्भिरूर एव आप्ताः तच्चयथा॥ धृतिलिप्ता ७०ःस
हितैः षड्भिर्भागैरिति॥ दशाहतेन नतभागो नाह॥ ॥ताष्टेंद्रव उदयाद्दिना
र्धकलादि फलं तत्॥ अष्टादशकलामध्ये रहितं कार्यं॥ कलास्थाने यद्वा
नष्टं उदयति तदा षड्भाग दैकोयात्यः॥ यदा कला तत्र षष्ट्याधिकं तदा षष्टि
भक्त भागात्मकं कार्यं॥ तद्भागस्थाने शेषध्यं अनेनयेरहितास्तेभाज्यफ

ग्र-
५६

ळं स्वदिक्‌नतांशादिक् अंगुलाद्या नतिः स्यात्॥ एतत्संस्कृतो अंगुलादि उ-
शरः स्फुटः स्यात्॥ अमुतः स्फुटशरात्॥ उक्तवत् स्थितिखण्डादिकं कार्यं॥ के
लात्मकं फलं ६८।११ अनेन एते ६।१८ रहिताः ५।१७।४९ अनेन पृथक्
स्थाप्याः ६८।११ मक्षाःफलं अंगुलाद्या नतिर्दक्षिणा १२।१६ नतांशा
नां दक्षिणत्वात् नत्या संस्कृतो अंगुलादिः शरः जातः स्पष्टः शरो द
क्षिण ७।२।२४ गतिर्हिघ्नी त्यादिना रविबिंबं ११।१८ चंद्रबिंबं ६।४९ माने
क्यखंडं ९।२८ ग्रासः ८।१४ अथ स्थित्यानयनं॥ ॥मानैक्यखंडं ९
२८ इषुणा २।२४ सहितं ११।५२ दशाघ्नं ११८।४० ग्रासेन ८।१४ गुणि
तं ९७।३७।५४ इदं वारद्वयं षष्ठ्या सवर्णितं ३७।३६।४१ अस्य मूलं ३२ ५६
१२

इदं पृथक् ३२।१२ अस्य रसांशेन ५।२२ पृथक्स्थं हीनं २६।५० चंद्रबिंबे
न ९।४९ भक्तं जातं घटिकादिका स्थितिः २।४४ अथ स्पर्शमोक्षकाल
ज्ञानमाह॥ ॥स्थितिरिति॥ ॥स्थितिः २।४४ रस ६ हताः जाताः अं
शाः १६।२४ वित्रिभं ८।२।४६।१७ पृथक्स्थं ८।२।४६।१७ एकत्र रहितं
७।१६।२२।१७ अपरत्र सहितं ८।१९।९।१७ स्पर्शसाध्यमाने रहितं मो
क्षसहितं स्पर्शमोक्षजे वित्रिभे भवतः इत्यनेन प्रकारेण वित्रिभस्य गणिता
गततिथ्यंतात्मध्यस्थितिखण्डघटिकाभिः स्पर्शमोक्षकालीन करणा
र्थं चालनमुक्तं इदं स्फुगमत्वादुक्तं परंतु किंचित्स्थूलं भवति॥ अथ सूक्ष्मो
पायततिथ्यंत कालीन सूर्यस्य स्थितितुल्य घटिकाभिः गतगम्यचालनं

ग्र- दत्ता स्पर्शमोक्षकालीनः सूर्यः कार्यः स्पर्शेचालनं रहितं कार्यं मोक्षेसहित उ.
५७ मिति॥ एवमध्यदर्शांतिः एकत्र स्थिति घटिकाभिः रहितः कार्यः तत्र स्पर्श
कालो भवति॥ अपरत्र युक्तः कार्यः तत्र मोक्षकालो भवति ताभ्यां लग्नं
साध्यं तत्र त्रिभोनं कार्यं स्पर्शमोक्षजे वित्रिभे भवतः॥ आभ्यां लंबने कार्ये
तत्र प्रथमे रहिता लंबनं साध्यते॥ वित्रिभं ७।१६।२२।७ अस्य क्रांतिर्दक्षिणा
२१।२४।३९ अक्षांशसंस्कृते जाता नतांशा दक्षिणाः ४६।५१।२१ अस्या दृ
ग्ज्याः २।७ वर्गितः ४।२८ पृथक् ४।२८ ऊनः २।२८ अर्धितः १।१४ ए
तद्युक्तः पृथक्स्थः ५।४२ सार्को जातो हारः ७।४२ पर्वांतकालीनः सू ५७
र्यः ८।५।२६।२५ गतिः ६१।१५ स्थिति घटिकाभिः २।४४ चालिता जातः

स्पर्शकालीनः सूर्यः ८।५।२३।३८ स्पर्शकालीनं त्रिभोनलग्नं ७।१६।२२
७ त्रिभोनोदयार्कविश्लेषः ११९।१।२१ अस्यांशाः १२।१।२१ अस्य दशां
शः १।५४ अनेन हीनाः शक्राः १२।६ एते दशांशेन गुणिताः २६।५८
हारेण ७।४२ भक्ताः फलं नाडिकाद्यं लंबनं ऋणं १।७ अथ मोक्षकालीनं
लंबनं साध्यते॥ ॥तन्नांशैः सहितं वित्रिभं ८।१९।४।७ अथ मोक्षकाली
नं लंबनं साध्यते॥ तस्य क्रांतिर्दक्षिणा २३।४७।२८ अक्षांशैः संस्कृता
जाता नतांशा दक्षिणाः ४९।५।४ अस्य दृग्ज्याः २।१४ वर्गितः ४।५९
पृथक् ४।५९ ऊनः २।५९ अर्धितः १।२९ एतद्युक्ताः पृथक्स्थाः ६।२९
सार्कः जातः हारः १८।२८ मोक्षकालीनः सूर्यः ८।५।२५।१२ मोक्षकाली

ग्र· ५८ नः सूर्यः ०।५।२५।१२ मोक्षकालीनं त्रिभोनलग्नं ८।१५।४।३७ त्रिभोनो उ·
दयार्कविश्लेषः ०।१३।४९।१५ अस्यांशाः १३।४९।१५ अस्य दशमांशाः १।२२
अनेन हीनघ्नशक्राः ७।१५ हारेण भक्ताः लब्धं घटिकाद्यं लंबनं ०।५६
मध्यस्थितिविरहितयुक्तो मध्यदर्शः ताभ्यां लंबनाभ्यां संस्कृतः स्पर्शमुक्त्योः
कालौ स्तः ॥ मध्यस्थितौ रहितो मध्यदर्शान्तः स्पर्शलंबनेन संस्कृतो मोक्षका
लः स्यात् ॥ पूर्वं मध्यलंबनसंस्कृतो मध्यदर्शांतो मध्यग्रहणकालो ज्ञेयः ।
इत्यनुक्तमपि बुद्धिमता ज्ञात्वेन योज्यं ॥ मध्यदर्शः १३।१४ स्थित्या २०।४४
विरहितः ४।२० स्पर्शलंबनेन १।३७ संस्कृतो जातः स्पर्शकालः ९।१३ मध्य ५८
दर्शः १३।१४ स्थितियुक्तः १५।४८ मोक्षलंबनेन ०।५६ संस्कृतो जातो मो

क्षकालः १६।४४ ॥ ॥ अथ मीलनोन्मीलनसाधनं पर्वणो नाश्यत्वं पर्वज्ञानं
चाह ॥ ॥ मर्दादिति ॥ एवं पूर्वोक्तप्रकारेण मर्दान्मीलनोन्मीलने स्तः ॥ एत
दुक्तं भवति ॥ मर्द इरसहितः अंशाः स्युः तैः पृथक्स्थापितं विमर्दं सन्मीलने सा
ध्यमाने रहितं ॥ उन्मीलने सहितं ॥ आभ्यां उक्तवल्लंबने कार्ये मर्दरहितयुतो मध्य
दर्शः आभ्यां लंबनाभ्यां संस्कृतः सन्मीलनोन्मीलने स्तः ॥ रवीन्दोः अंगुलात्मो ग्रा
सो यदा एष्यति तदा न आदेश्यः ॥ चंद्रग्रहणे चंद्रोऽल्पार्धसर्वग्रस्तः सधूम्रः कृ
ष्णः पिंगलः स्यात् ॥ अल्पग्रासे धूम्रवर्णः ॥ अर्धग्रासे कृष्णवर्णः सर्वग्रासे पिं
गलः स्यात् ॥ अर्कः सदैव अल्पार्धग्रासेषु कृष्णवर्ण एव ॥ ॥ अथ इष्टग्रासा
नयनमाह ॥ ॥ इष्टमिति ॥ इष्ट १ हिर्न २ कृतं ०।४ शुणं १६।१८ स्पर्शका

ग्र॰ ळः ०।३ मोक्षकाल १६।४४ योरंतरं ७।५१ भक्तं फलं २।९ रूपार्धेन त्रिंशद्यं उ॰
५९ शुल्कैः युतं २।३९ इष्टकाले अर्कस्य ग्रासं विंद्यात् ॥ शेषं वलनपरिलेखादि
कं पूर्ववत्कार्यं ॥ ॥ लंबनसंस्कृततिथ्यंतः १२।५३ तत्कालीनो रविः ०।८।२६
४४ त्रिभयुतः ११।५।२६।१४ अयनलवाढ्यः ११।२३।३०।१४ इतः चरखद
लैः नगशरेंदुमितैरित्यादिना वलनं दक्षिणं ११३० मध्यग्रहणवर्तिः कालः
१२।५३ दिनार्धं १३।१३ यातः शेष इत्यादिना नतं पूर्वं ०।४० विषयलब्धे ग्रह
रि ०।११।०।० अस्मान्नगशरेंदुमितैरित्यादिना आनीतं लवनं ०।१४ पलभया
गुणितं ११२० पंचभक्तं जातं १४ वलनमुत्तरं ०।१६ पूर्वनतत्वात् उभयोः संस्कृ ५९
तिः ०।१४ रसभक्ता आता वलनां ग्रा दक्षिणाः ०।१२ ग्रासः ८।१४ षष्टिगु

णितः ४८४ मानैक्यखंडेन ४१२८ भक्तः
फलं ४६।१४ अस्य मूलं ज्ञाताः छन्नांगुलयः
तथायं परिधिर्लेख्यः ॥ ॥ इति श्री विश्व
नाथविरचिते ग्रहलाघवोदाहरणे सूर्यग्रहण
स्योदाहरणं ॥ ॥



[illegible]

श्रीगणेशाय नमः ॥ अथ मासगणाद्ग्रहणद्वयसाधनमाह ॥ अथेति ॥
अथानंतरं मासगणात्कृतरीत्या युक्तिः यया ग्रहणद्वयस्य सिद्धिः सा
धनं तस्य कुलेलेन रथं स्फुटसूर्य विपात तिथीन् तथा वर्ष षिविंबानि ग्रा
सनं च तेषां विशिष्ट चमत्कृतये अभिदधे प्रवक्ष्ये ॥ आदौ ध्रुवाकानाह
॥ भानोरिति स्पष्टार्थः ॥ अथ क्षेपकानाह ॥ क्षेपक इति ॥ स्पष्टार्थः ॥
अथ मध्यार्कव्यगुसाधनमाह ॥ मासाविति ॥ संवत ॥ १५६६ शाके १५३४
कार्तिकशुद्ध १५ गुरौ घटी २२ पळे २३ भरणीनक्षत्र घटी २२।१४ वजं

ग्र० योगघटी४४।४४।अहाः १२ चक्रं ८ अधिमासाः २ मासगणः ५७ द्वि ३०
५९ गुणितः ११४ नगषट् ६७ भक्ते फले राश्यादि ९।२९।२७ अनेन रहितो
मासगणो जातो रविः ।७।८।५७।११। रवेर्ध्रुवकः ०।१।४०। चक्रे हतः
०।१३।२०।० अनेन रहितो रविः ६।२५।३७।११ रविक्षेपकेण ०।१।२।३ यु
तो जातो रविः ६।२६।५८।१२।अथ विपातसाधनं॥ मासगणः ५७
तेराशयः ५७ मासगणः ५७ अस्य त्रिगुणः १७१ अनेन रहितः मासग
णः जाताः अंशाः ३८ मासगणः ५७ अस्यांघ्रिः १४।१५ एताः कलाः
एवं राश्यादि व्यगुः १०।८।१४।१५ व्यगोर्ध्रुवः ५।१।१२ चक्रैः ८।१३।५० ५९

अनेन युक्तो व्यगुः ६।१७।५०।१५ क्षेपेण ११।७।१८ युक्तो जातो व्यगुः
५।२५।८।१५ अथ केन्द्र वारादि साधनेमाह॥ साद्यं इति॥ मनु तष्टमासाः
१ स्वकीयेन सप्तमांशकेन राश्यादिना ०।४।१७।८ हीनाः ०।२५।४२।५२ यु
तो ध्रुवकः ९।१।६ चक्रे हतः ०।८।४८ अनेन युक्तः १।१०।१२।२४ क्षेपकेण
०।१४।५१।युक्तो जातं केन्द्रं १।२५।३।१५ अथ वारादि साधनं॥ मनु तष्टमा
साः स्वकीयेनार्धेन ०।३०।० युक्ताः १।३०।० मासगणः ५७ द्विगुणः ११४
मगणैः २२ भक्ते फले १।४४।३१।५ अनेन युक्तं वारादि ५।२०।८ अथ

ग्र० मासगणात् उत्पन्नानां ख्यादीनां ध्रुवकादिसंस्कारमाह ॥ मासेति ॥ मा उ०
६२ सगणात् [illegible] नित उत्पादितो रविः निजेन चक्रहत ध्रुवकेण ऊनः
कार्यः ॥ इतरे विपातादयः चक्रहतध्रुवकेण संकलिताः युक्ताः ते स
भी ४ र्वे निजक्षेपकेण युताः ॥ निजे [illegible] मासि मितो ते पूर्णमासं ते स्युरि
ति ॥ अथ पक्षचालनमाह ॥ रवौ पाक्षिकमिति स्पष्टार्थः ॥ अथ षाण्मा
सिके चालनमाह ॥ शरा इति ॥ स्पष्टार्थः ॥ अभीष्टतिथिसाधनमाह ॥ राम
अभीप्सितभिमा तयाः तिथेः सिध्यै प्राकू पौर्णिमास्याः पूर्वपरपक्षा ६२

त्याः यावत्यः इष्टतिथ्यः स्युः ताः सचतुः षष्टिभागेन ऊनाः सत्यः दिनाद्य
चालने स्यात् ॥ स्वस्य चतुस्त्रिंशदंशेन ऊनास्ता एव तिथयः दिनेशोसू
र्यभागाद्य चालने स्यात् ॥ ततस्ता एव तिथयः दिनेशः सूर्यभागाद्य
चालने स्यात् ॥ ततस्ता एव तिथयः त्रयोदशभिर्गुण्याः ततः स्वस्य
त्रिनवतिभागेन ऊनाः इन्दोः चालने स्यात् ॥ अथ तिथिसाधनार्थं त
त्कालरविमंदकेंद्रफलसाधनमाह ॥ अत्यष्टीति ॥ अत्यष्टिः सप्तदश
अष्टिः षोडश वर्षा ऋतु दश अर्काः द्वादश गावः नवशराः पंचदस्राः द्वौ ॥
एतानि खंडकानि स्युः ॥ इत्तेभ [illegible] अथ षमे वलुजः ॥ अस्य भागाः

१७० ५५।३१।५५ त्रीं ३।१९।२८ रवेः ४१ तत्प्रमित गतखंडकानां योगः ५९ अगतेन ७०
भोग्यखंडकेन ९ गुणिते अवशेषे ३१।३१।५२ निघ्ने २७।२३।३१।४८ अस्य
दि३ विंशांशः ३१।७।१७ अनेन गतखंडयोगयुक्तः ६१।७।१७ प्राग्वदि
ति मेषादि षट्कस्थत्वे फलं धनं ॥ तुलादिकगे ऋणमित्यर्थः ॥ हतस्य
मेषादिकेंद्रत्वात् धनं हृतेफलं ६१।७।१७ रविः ६।२९।५८।१० मे वा ०।७
स्यात् २।१९।२५ स्फुटः जाते रवेः केंद्रं ७।८।१९।४७ अस्य भुजांशाः ।४७
१।४१ तयोर्दशमकाः फलं ३० तस्य गतखंडयोगः ७० भोग्य दि३

खंडकेन १२ शेषे ९।१।४१ गुणिते ७८।२८।१२ अस्य विंशांशः ६।२०।७ अ
नेन गतखंडयोगं युक्तः ५५।२०।० इदं द्विभक्तं २७।४०।० स्वकीयेन ष
डंशेन ४।३६।४० रहितं २३।३।२० तुलादिकेंद्रत्वाज्जातं रविफले
ऋणं २३।३।२० फलद्वयसंस्कृतेः धनं २८।३५।१ अथ हरसाधन
माह ॥ हृतेष्येति ॥ हृतस्य भोग्यखंडं ० बद्धमक्तं फलं १।२०। अनेन
संगुणाः वल्लयः २०।२० हृतस्य मकरादि षट्कस्थितत्वाद्रहिता जा
तो हारः ॥२८।५० अथ सूर्याद्युच्चं प्रोक्तवत्कार्यं ॥ सूर्यः ६।२९
५८।१९

२७० अयनांशाः १८।७० सायनरविः ७।१८।८।१८ अस्मात् रेधनं ८४॥ अथ ३०
५४ तिथिसाधनमाह॥ नाड्य इति॥ फलसंस्कृतिः ३।८।३।५७ दशाहता ३८०।
३५।३० हारेण ८०।५० भक्ता फलं नाड्यः संस्कृतेर्धनत्वाद्धनं॥१७।१८
चरधनं ८४ सायं लक्षणकं स्यात् यथास्तमयिकमिति स्फुटं जातं करणं ५४
देशान्तरयोजनानि ५४ स्वो [illegible] १५ नानि जातानि देशान्तरफला
नि [illegible] ऋणत्वात् पूर्वत्वाद्धनानि॥ फलत्रयसंस्कृतिः धननाड्यः १७ ५४
वृद्धतिथिः ५।२८।४ फलत्रयसंस्कृता जाता स्पष्टा गुरो घटी [illegible]

पलानि ४४ फलत्रयसंस्कारघटिका १२ पलानि ३६ एतत्तुल्यफलादिसं
स्कृतोऽर्कः ७।०।१०।५५ यागुश्च ५।२५।२०।५९ अथ यागुरविस्पष्टीकरण
माह॥ वेदघ्नमिति॥ रविफलं २३।२।२० वेद ४ घ्नं ९२।९।२० स्वकीयच
तुर्विंशतिभागेन ३।५०।३३ सहितं जाताः कलाः ९५।१३ तरणिफलस्य
[illegible]॥ रविफलं धनं चेत्तदा एताः कलाः यागुवर्कयोः संस्कृ
ताः जातः स्पष्टो रविः ८।२८।३४।५२ स्पष्टो यागुः ५।२३।४४।२८ हारः
८०।५० विश्वांशाद्धि ११४० स्फुटे ३०।३० कृशानु ३ भक्ता लब्धमंशस्तत्पंच

ग्रह०ला०

द्रबिंबं १०।१० अथ रविबिंबभूभासाधनमाह॥ रवाब्धीति हारः २८।५० पंचघ्न ६०
६५ रहितः २३।५० स्वकीयेन पंचदशभागेन १।३५ युक्तः २५।२५ सूर्यफलहा
धने भोग्यखंडं १२ पंचांकं फलं ०।१८ रविकेंद्रस्य केकीदि हरणं जाता भू
भा २५।११ अथ ग्रहणसंभवमाह ज्ञात्वेति एवं तिथिपूर्वकं तिथिध्य
ग्वादिकं ज्ञात्वा शेषं तिथिवारादिकं पूर्ववत्तच्चंद्रग्रहणवत् वेदित् अ
र्केंद्वोर्ग्रहणसंभूतेः सकाशात् अन्यग्रहणसंभूतिः षण्मासैर्यदेत्र।७ ६५
ते अथवा पक्षवर्जितैः षण्मासैः ग्रहणं विलोकयेत् अथवा पक्षैः पंचदश

दिने विलोक्यं॥ आदौ यत्र ग्रहणं विलोक्यं तत्र चेन्न ग्रहणं तदा तत्र च्यानाच्य
ग्वादीनां षण्मासचालनं धनं देयं॥ तत्र चेन्न तदा पक्षचालनं ऋणं देयं॥ तत्र
चेन्न तदा पक्षचालनं धनं देयं॥ एवमग्रे पुनश्चालनं कृत्वा ग्रहणं विलोक्यं।
तत्र व्यगोः भुजलवैः तिथ्यल्पकैः अर्कग्रहणं स्यात्। कस्मिन् सति द्युरात्रग
तिथौ सति। दिनमानात् तिथौ न्यूने सति सूर्यग्रहणं विलोक्यं। चेद्रात्रिगततिथ्यं
तस्तदा चंद्रग्रहणं विलोक्यं। चेद्यथेवा अहर्निशामाश्रिते सति। इदं ग्रहस्ता
दितग्रस्तास्तं वा ग्रहणं स्यात्। अथ चंद्रच्छन्नानयनमाह। सप्तांशा इति
हारः २८।५० सप्तांशगुणेन ३।२० रहितः २५।३० वेदघ्नः १०२।० नवाप्त

भक्तः ११।२० व्यगोर्स्तुजांशेः ६।१५ रहितः ५।८।४८ यदा व्यगुस्तुजांशेः हीनो न भवति
तदा चंद्रग्रहणं न स्यात्। एकादशभिर्गुणितः ५५।५२।४८ सप्तभक्तः फलं अंशीतरुचः
चंद्रस्य अंगुलाद्यं छन्नं भवेत् ७।५८ चेत्यथवा अथसूर्यग्रहणे ग्रस्तोदिते ग्रस्तास्ते
नेत घटिकाज्ञानमाह चेदिति चेन्निशेष्यके रात्रिशेषे रात्रिगतेवा अर्के ग्रहस्त
दायावतीभिः घटिकाभिः रात्रिशेषगते वा सूर्यग्रहणं स्यात्तदा तावतीभिर्घटिकाभिः
दिवादलं अन्वितं कार्यं तत्तथाकृपरं नतं भवति ॥ रात्रिशेषे प्राकुनतं रात्रिगते पश्चिम
नतं स्यादित्यर्थः अथसूर्यग्रहणे किंचित्स्फुटग्रासानयनमाह अभांतेभि
अस्योदाहरणं सूर्यग्रहणे॥ अथपर्वेशानयनमाह व्यगुमध्येति मासग
णात्तु मध्यमव्यगुसाधने येराशयस्तेद्वादशभक्ताः फलं पर्ययगणो भवति॥ व्यगु

मध्यपर्ययगणः १० द्विगुणः २० वणिगादिगे तुलादिषट्के व्यगुग्रहे सति एकयुक्तः
कार्यः॥ चक्रं ८ तेन युतः २८ सप्ततष्टः शेषं ० विधिनः ब्रह्मणः सकाशात् गतपर्व
पो भवति॥ अत्र पर्वस्वामी ब्रह्मा॥ पर्वेशाः सप्त वराहेणोक्ताः॥ षण्मासोत्तरवृध्या
पर्वेशाः सप्तदेवताः क्रमशः॥ ब्रह्मशशीन्द्रकुबेरावरुणाग्नियमाश्च विज्ञेयाः॥
एतस्य प्रयोजनं शुभाशुभकथनाय॥ अथचंद्रसाधनं तत्कृतिसाधनं चाह॥ ति
थीति॥ तिथिर्द्वादशगुणिता जाता अंशाः १८० अनेन रविः ६।२८।३४।५२ युक्तः
जातश्चंद्रः ०।२८।३४।५२ एवं इष्टतिथियो द्वादशगुणाः भागाः भवंति॥ तेभ्यो
गैर्युतोर्कः विधुः स्यात्॥ हरः २८ ५० चतुर्विंशत्या २४ गुणितः ६९२० द्विघ

क्षिप्तयुक्तः जातश्चंद्रस्पष्टगतिः ७५४।० रवचरशर कलाः सूर्येणयुक्तिः॥ ततः सूर्यचंद्राभ्यां भ
युतिजाः नक्षत्रयोगजागतगम्याः घटिकाः साध्याः ताः तिथिरेवायां स्पष्टतिथ्यादि
ध्यंतेव वर्तमानोनीतयोगतिष्याः घटिकाः तिथ्यंतात्स्फुरित्यर्थः॥ नक्षत्रोदया
त्तथापि तो रविचंद्रोस्तिथ्यंतकालिकौ॥ तास्तिथिघटी मध्येकुनेणहीनयुक्ताः सत्यः
स्फुटोदयात्स्नक्षत्रयोगघटिकाः स्फुरित्यर्थः॥ तिथ्यंतात् ७।४७ कृत्तिकानक्षत्रस्य
गतघटिकाः ११।८ लब्धघटी ६०।२ वरीयान्योगस्यगतघटिकाः ४६।२८ लब्ध
घटिकाः १२।३२ अथमासगणात्सूर्यपर्वसाधनं॥ संवत् १६६८ शके १५३४
वैशाखकृष्ण ३० बुधे १८ दिन २८ पलानि ८ रोहिणीनक्षत्रघटी ३१।५७ धृतियोगघ
टी ४२।१ ऐक्ये ८ मासगणः ४१ द्विगुणः १०२ नगपत्र ६० भक्ते फलं रा श्यादि

१।१४।४०।१७ अनेनमासगणः रहितः ३।४।१९।४२ चक्रानि ध्रुवकेण ०।११।२०
रहितः १।०५१।४२ क्षेपयुक्तः जातोरविः पौर्णिमांते ३।५।२०।४२ पक्षचालनेन ०
१४।७३ युक्तो जातो अमांते रविः १।१९५।३।४२ अथ विराध्रुव साधनं॥ उक्तध्रुवज्जातः
पौर्णिमांते ११।२१।६।४५ पक्षचालनेन ०।१५।२० युक्तो जातो अमांते ध्रुवः ०।६।१६।२४
अथवृत्तानयनं॥ जातंपूर्णिमांते ८।२०।१०।४२ पक्षचालनेन ६।। २५।४ युक्तं
जातममांते वृत्तं २।१३।४।४२ अथ राध्रुवानयनं उक्तं वे जातं वाराध्रुवं ३।५४ पक्ष
चालनेन ०।४५।५५ युक्तं जातममांते वाराध्रुवं ३।५४ वृत्तफलं धनं ७।१।२।५।२ वे
केंद्रं ०।२८।६।१७ रविफलं धनं फलद्वययोगः धनं ८।२।४।१ लब्धं रवेरुदयाद्धोरा ०

१६८

४० स्पष्टो चरं करणं १०८ साधं लक्षणार्क मिश्रकृतावद्धने जातं १०८ फलं संस्कृ
तिः ८१।४१।९ देशांतरघ्ना ८९०।४०।४० हारेण ३०।४० भक्ता फलं ना ०ः संस्कृ
तेर्धनत्वात् सूक्ष्मं २१।२ देशांतरयोजनानि ६४ सौधकलानि १६ जातानि ४८ देशांत
रपलानि ४८ रेखातः पूर्वं तात्पलानि फलत्रयसंस्कृतिर्धनत्वात् ः ३१।३८ तिथिः
१५।५।२ फलत्रयसंस्कृता जाता बुधे घटी २६ पलानि ४० फलत्रयसंस्कार घटी
तुल्याः कलिकाः ३१।३८ फलसंस्कृतो रविः ९।२०।२५।२१ व्यर्कः ७।४६।५८
२३ तरणिफलं ९।४।२।४० वेदे ५८।४६।४० स्वसिध्धभागेन २४।। ६८

१।२६।५८ युते जाताः कलाः ६।१७ तरणिफलस्य धनत्वाद्धनं कलाभिः संस्कृ
तो रविः स्पष्टः ९।२१।२६।३४ स्पष्टो व्यर्कः ७।५९।३६ चंद्रबिंबं १०।२६।। अथ
सूर्यबिंबानयनं।। सूर्यस्य फलसाधने भोग्यखंडं ४९ खवेदाप्ता ४० लब्धं ०।२१ व्यरि
लवभावाः १०।५० मकरादिकेंद्रत्वाद्रहितजातमंगुलाद्यं केंद्रबिंबं १०।२९ अथ
सूर्यग्रासानयनमाह।। अमांतीयं २६।४० दिनार्धं १६।४८ नतपश्चिमं ९।५२
अस्य चतुर्थांशो राश्यादिः २।१४।०।० पश्चिमनतत्वाद्विद्यमानत्वात् अंशेण
युक्तो रविः ११।५।२६।३४ अस्य क्रांतिरुत्तरा १३।५२।२२ अक्षांशा दक्षिणाः
२५।२६।४२ क्रांत्योः सजमसंस्कारात् जातान नतांशा दक्षिणाः ११।३४।२०

६९ अस्य षडंशाः दक्षि १।५५।७३। व्यगुभुजाभागउत्तराः ४७।५९।३६ षडंशेन सं
स्कारिताः जाताः स्पष्टाः ६।७।५७ सप्तव्युक्ता ०।५६।० स्वीयार्ध ०।२८।३
सहितोऽज्ञातो गुणाग्रोयासः १।२४ व्यगुमध्यपर्ययगणः ६ पर्वेशा मीय
मः॥ ब्रह्मेंदु शक्र वित्तवरुणाग्नि यमाः क्रमात्॥ प्रकीनभगणो काद्य द्वि
मितग्रहणाधिपाः॥ इति ब्रह्मसिध्धांते॥ तिथि ३० द्वादशगुणा जाताः
अंशाः ३६० एतत्सहितो रविर्जातश्चंद्रः १।२१।२८।३४ चंद्रगतिः
७९८।०४ सूर्यगतिः ५९ तिथ्यंतात् रोहिणी नक्षत्रस्य गतघटिकाः
५१।३७ एष्यघटी ८।३१ धृतियोगस्य गतघटी ३०।७ एष्यघ ६९

टी १५।५३॥ ॥इति मासगणात्सूर्यग्रहणोदाहरणं २॥ शालिवाहनश
के १७३४ अंगिरासंवत्सरे चैत्रे शुक्ल २ वर्तमान तृतीयारविवासरे सायंका
ले समाप्तं॥ ॥अथ पंचांगात् ग्रहणद्वयसाधने अथेति अथवा
प्रकारांतरेणायं पर्वांत घटिकादिकः तिथिपत्रतः पंचांगात् अवगम्यो ज्ञा
तव्यः पत्रपर्वांते रविस्पष्टो राहुश्च ज्ञातव्यः तिथिपत्रस्थैः रविराहुगते
र्षा दिनाहतैर्या दिनापर्वांते यत् विद्यमान नक्षत्रं तस्य गतैष्यघटीयो
ग ज्ञातव्यः द्युमाने दिनमानं अवगंतव्यं एवं सर्वत्र तिथिपत्रात् ज्ञा

ग्र॰ह॰ उदा॰

६० त्वातेभ्योग्रहणद्वयंप्रवक्ष्मीत्यर्थः उदाहरणं संवत् १६८९ शाके १५५४
७० वैशाखपौर्णिमा सोमे गतघटिका २५।३३ एष्यघटी ५२ पले १० गतैष्य
योगः ५६।४३। अनुराधागतघटी २०।४९ एष्यघटी ३८।३८ गतैष्ययोगः
५८।३६ दिनमानघटी ३३ पर्वान्तकालिनो रविः ०।१६।३४।३० राहुः ११।४
१८।११ विराहुर्कः ११।२२।१६।२६ अथ छन्नानयनमाह ॥ ॥ताराइ
ति ताराघट्ट्य ६२।२ सप्तरहितेन तिथिगतैष्यघटीयोगेन ५९।३७ भक्ताः पू
र्णयोगाद्यं १२।२६।३७ विराहुर्कस्य भुजांशैः ७।३७।३४ हीनाः ४।५२।० ६०

एते निजार्धेन ३।२६।३७ निजषोडशांशेन ०।१८।१९ युक्ताः जातो ग्रासो ग्रा
सः ७।३७।५९ यदा भुजांशाः [illegible] स्युस्तदा ग्रहणसंभवो न स्यात् अथ वर्णभूमा
साधनमाह अंगेति तिथिघटिकाः ५६।४३ षड् ६ युक्ताः ६२।४३ अनेन वर्णा
कं तैर्वो ६२।४५ भक्ताः फलमंगुलाद्यं वर्णं विं ११।८ तिथिनाड्यः ५६।४३ दशाहीनाः
४६।४३ अनेन दन्तैर्द्वा १३।२२ भक्ताः लब्धमंगुलाद्या भूमा २८।१७ अथ
मानैक्यार्धस्य संस्कारमाह कुद्वेति कुद्वस्पृइत्यादि व्यंगुलैः ११।१६।२०।१६
११ भूभाकमात्तुल्यादिषट्के विरहिता मेषादिषट्के सहिता कार्या ॥ सा नाडिकोद्
वकुभा स्फुटा भवेत् । सूर्यस्य मेषादिषड्राशिमध्ये तु वा राशौ स्थितत्वात् पाउ
शांगुलैर्युताजाता स्पष्टा भूभा २८।३३ अथ नक्षत्रघटिकाभ्यः छन्नानय

नमाह ॥ विदश्रोति ॥ नक्षत्रगतैष्यघटीयोगः ५८।३६ दशहीनः ४८।३६
अनेन खभ्रषट् ६०० भक्ताः फलमंशाद्यं १२।३२।५९ एतेष्यगुरुवर्कस्य भुजां
शैः ७।४३।३४ वर्जिताः ४।४९।३० एकादशाभिर्गुणिताः ५३।१८।३१ स
प्तभिर्भक्ताः फलं अंगुलाद्यो ग्रासः ७।३४ अथवा चंद्रबिंबभूभा
साधनमाह ॥ भेति ॥ नक्षत्रघटीयोगेन ५८।३६ नववेदर्तवः ६४९
भक्ताः फलमंगुलाद्यं चंद्रबिंबं ११।१४ विमनूं १४ घट्यः ४४।३६ अ ३
नेन शराक्षद्विभुवः १२५५ भक्ताः फलमंगुलाद्या भूभा २८।१८
षोडश १६ युतं खलैर्युता जाता स्पष्टा भूभा २८।२४ अथवावि ७१

नृपो १६ द्युघट्यः ४२।३६ अनेन खखार्कैः १२०० भक्ताः जाता भूभा षोडशयुक्तं
खलैर्युता जाता स्पष्टा भूभा २८।३६ इति चंद्रग्रहणं अथ सूर्यग्रहणं शाके १५३२
मार्गशीर्षवदि ३० बुधे गतघटी ५१ पले ५० एष्यघटी १२ प - ५९ अनयोर्योगः ६४
४९ मूलनक्षत्रगतघटी १३।५४ एष्यघटी ५२।२ योगः ६५।५६ दिनमानं २६
४ तिथ्यंते सूर्यः ७।५।२६।२० राहुः २।११।४१।१८ विराहुर्कः ५।२३।४१।२
अमांतः उन्नतपूर्वं ०।३ अस्य चतुर्थो राश्यादिः ०।०।२२।३० अनेन पूर्वेन तस्य
विद्यमानत्वाद्रहितो रविः ७।५।३।५० अस्य क्रांतिर्दक्षिणा २३।४३।४० क्रांत्य
क्षसंस्कारे जाता नतांशा दक्षिणाः ४९।१०।२२ अस्य षडंशः ८।११।४३ दक्षिणः
व्यगुभुजभागः उत्तराः ६।१४।५८ षडंशेन संस्कारिताः स्पष्टाः व्यगुभुजभागाः

११।६।५५ अथ तिथिक्षयघटिकयोरवेः स्फुटानयनमाह स्वल्पेहेति ति
७२ थिघट्यः ६।३४ आभिः स्वाल्पष्ट्यो १७० भक्ताः फलमंशाद्यं ०।३७।२२ चतु
र्युक्तं ६।३७।२२ व्ययुस्फुटलवैर्हीनः ३।४०।३७ भवसंगुणाः ५१।२६।४७
शैलभक्ताः फलमंगुलादि सूर्यस्य स्फुटं ७।२०।५८ नक्षत्रघटीभिः ६।५।५६
देवनयनाः २३३ भक्ताः फलमंशाद्यं ०।३२।१ त्रिभिर्युक्ताः ६।३२।१ व्य
युस्फुटलवैर्हीनाः ४।३५।१६ भवैः संगुणाः ५०।२०।५६ सप्तभिर्भक्ताः
प्रकारांतरेण ग्रासः ७।१४। अथ सूर्यबिंबानयनमाह रविलवेति र
विः ८।५।२६।२० द्वादशभागैर्युक्तः ८।१७।२६।२० अस्य भुजांशाः

 ७२

७७।२६।२० एषां त्र्यंशः व्यंगुलात्मकः २५ सूर्यस्य तुलादिषड्राशिस्थितत्वादेते
र्व्यंगुलैः विरसलवमहेशाः १०।५० युक्ताः जातं सूर्यबिंबं ११।१५ एवं स्फुटमाद्यं
ज्ञात्वा स्थितिसुखेयद्वेशाद्यं तत्पूर्ववज्ज्ञेयं इति ग्रहलाघवस्योदाहरणे पंचा
गाद्ग्रहणद्वयसाधनंमोह अथोदयास्तोदाहरणे तत्र तावच्छुक्लप्र
तिपदि चंद्रोदयज्ञानं त्रिभिः श्लोकैराह सार्काशेति शके १५३२ माघ ३५
शुक्लप्रतिपदि शनौ घटि ७ श्रवण नक्षत्र घटिका २८ पल २५ सिद्धियो
ग घटी ४।८ चक्रं ८ अहर्गणः १०३६ प्रातर्मध्यमाः रविः ९।६।१२।३८
चंद्रः ९।१९।३८।३३ उच्चं ८।२४।५४।२८ राहुः २।१०।३।२५ पंचांग स्पष्टघटी

ग्र॰ ह

उदा॰

७३ मि७ चालिताः॥ रविः ९।२६।१९।३१ चंद्रः ९।२१।१०।४७ उच्चं ८।२०।५५।१४
राहुः २।१०।३३।१७ रवेर्मंदकेंद्रं ५।११।४०।२९ मंदफलं धनं ०।४१।२७ संस्कृ
तो रविः ९।२७।०।५८ अयनांशाः १८।८ चरं धनं ४६ चरसंस्कृतः जातः स्पष्टो
र्कः ९।२७।२।४४ स्पष्टागतिः ६१।४० फलत्रयसंस्कृतश्चंद्रः ९।२१।२५।१३ स्प
ष्टागतिः॥ मंदकेंद्रं ४।२९।३०।२० मंदफलं ऋणं २।३।४ संस्कृतस्पष्टचंद्रः
९।१८।५२।१२ स्पष्टागतिः ७०३ आभिः घटीभिः ०।५६ चालितो जातो ति
थ्यंतकालिको रविः ९।२७।३।३१ राहुः २।१०।३३।४ विराहुर्कः ६।२४।०।४० अ
र्कव्यग्वर्कौ द्वादशभागैः सहितौ रविः ९।१९।३।०१ विराहुर्कः ७।१९।०।४० ७३

इह पक्षांते प्रतिपदंत्यसमये अंते तात्कालिकार्कव्यग्वर्कौ साकांशौ कुरु॥ अथ केव
लायुगैः अयनांशौ विना व्यगोर्युतत्र चरं॥ व्यगुः ७।९।०।४० अस्मात्पर्युः ७।०।४
दुर्बाणैः ५६ गतं इदं फलं व्यगो दक्षिणगोलस्थत्वात् ऋणं॥ इदमेव फलं पृ
थक्स्थं ११५।० विभाज्यानीति   राशित्रयेण अयनलवैः अयनैर्युक्तैः अरुणः
सूर्यः ९।२७।११।४१ अस्मात्पूर्वं ५८ अनेन पृथक्स्थं ११५।० गुणितं ८५।०।०
भक्ते भा ५।४५ द्विगुणिता ११।३० अस्याः कृतिः १३२।१५ अनया पृथक्स्थं
द्विगुणितं भक्तं ०।३०।३३ व्यगोः सकाशात् द्विभ्यन वान्वितसूर्यस्य
भिन्नगोलत्वाद्धनं॥ अथ तृतीयफलं। सरसभा द्वयनांशयुतोर्कः ९।७

७४ ११।४१ अर्कोदयः ३४२ खखानलविशोधितः ४२।३।२ द्विकु२५ हृतः फलं १।४८
१० खखानलेभ्यसरंताभ्ययना कोंदयस्याधिकत्वाध्धनं॥ अथ चतुर्थफलं द्यु
मितीति द्युमतिः २६।२८ प्रतिपदंत ७।५६ अनयोरंतरं १७।३२ शर ५ भक्ते
५ ले ३।४२।२४ दिनमानस्य प्रतिपदंतापेक्षया अधिकत्वाध्धनं॥ तेषां चतुर्णां
फलानां संस्कृति धनं ४।५३।५७ अतस्तपना स्ते चंद्रोदृश्यः अन्यथा चतुर्णां फ
लानां ऋणसंस्कारे न दृश्यतेति इति चंद्रदर्शनं अथ मासगणाभ्यां गुरो
रुदयस्तसाधनमाह चक्राब्येति शाके १५३२ चैत्रशुक्ल प्रतिपदि आब्दाः
१०। चक्रं ८ मासगणः २५ चक्राब्दाः ३३ चक्रं ८ विश्वा १३ तत्फलं मासाद्यं ०।१ ७४

२७।४१। अनेनोनितः ३२।४१।३२।१९ द्विगुणितः ६४।२३।४।३८ दश १० मा
साः ५८ शेष दिनैः ११ युक्तः ७५।३।४।३ सप्तविंशतिभिस्तष्टः २१।४।४।३८
अयं मध्यगुरुः २७।५।२५।५५।२२ क्षापतः सगुरुः राश्यादिः २।२७।५७।४१
पृथकृ २।२७।५७।४१ पंचदशाभिरंशैरूनः २।१२।५७।४१ अस्य भुजांशाः ७२
५७।४१ एषां द्वादशांशाः ६।४।४८ तिथिभागेन राश्यादिकस्य मे षादिकत्वाशि
स्थितत्वादकांशेन पृथक् स्थो युक्तः जातः शेषचमासादिकः ३।३।२९।३ तस्मा
द्गुरोरुदयोस्तोश्लोकार्धेनाह तिथिदिनेति मासादिकः द्विधा ३।३।२९
एकत्र तिथि १५ दिनरहितः ३।१९।२।२९ अपरत्र युक्तः ३।१८।२।२९ एषां

तद्यथा।

७५ मासैः मंत्रिणः गुरोः क्रमेणास्तोदयौ स्तः स्यातां तिथिदिनरहितेन
मासाद्येन मासादिनघटिकाद्येनावयवेन॥ चैत्रात् गुरोरस्तः स्यात्॥
अन्यत्रोदय इत्यर्थः अथ शुक्रास्तोदयसाधनं साध्यर्धवृत्तेनाह
अथ मधुसुखेति मधुसुख मासाः २५ वेदैः ८ सप्तदशगुणितं १३६
अस्य शाखगुणो वो मासाद्याः ३०।४०।० अनेन सप्तदशगुणिताः
युक्ताः १३९।०।४०।० एते मधुसुखमासाः २५ संयुताः १६४।०।४०।
०। नागगुण ५ घ्नाः ८२०।३।२०।० उदधिरसदृग् ४६४ समेताः १०८४
३।२०।० छिद्रखेगाग्नि ९९ तष्टाः ९४।३।२०।० नवनवभ्यः ९९ शुद्ध ७५

द्धाः ४।५६।४०।० पंच ५ भक्ताः ०।५९।२०।० पृथक्स्थाः ०।५९।२०।० ऋक
त्रिरसगुण ३६ दिनहीनाः ०।१५।२०।० अन्यत्र युताः १।५३।२०।० तेः मा
सैः क्रमेण चैत्रात् भृगुजस्य शुक्रस्य हरिदिग् स्तः। अंकूदयः पश्चिमो
दयः स्यात्। यत्र हीनास्तत्र शुक्रस्य पूर्वास्तः। यत्र युक्तास्तत्र पश्चिमो
दयः स्यात्॥ अथ शुक्रस्य पश्चिमास्त पूर्वोदयसाधनमाह। नवमासेति
पृथक्स्थास्ते नवमासभघस्रतः सप्तविंशतिदिनाधिकनवमास
भ्युः चेद्ल्याः पुष्टाग्रास्तुस्तदा क्रमशः तेनैवमासभघस्रैः युतोनाः का
र्याः पृथक्स्थाः ०।५९।२०।० नवमासभघस्रतो ९।२७ व्याः अतो नव

मासभवघस्रैर्युताः ११।८।२०।१ युगवासरोनाः ११।४।२०।० अन्यत्रयुक्ताः ११
१२।२०।० यत्र हीनास्तत्र भृगोः शुक्रस्यतोयास्तपश्चिमास्तः। यत्रयुक्तास्त
त्रैस्युद्गमः पूर्वोदयः एतौ चैत्रादौ मासैरस्त इत्यर्थः अथ शुक्रगुर्वो
रुदयास्तकालपरिवर्तमाह मासैरिति शुक्रस्य पूर्वोक्तो योउदया
स्तकालः सप्यहिर्दिनैः षड्दिनरहितैः नखैः विंशतिमासैः १९।२४
शुध्यति॥ निरेषो भवति शुक्रस्य पूर्वोदयात् पूर्वोदयः परोदयास्तो
दये॥ अनेन १९।२४ कालेन भवतीत्यर्थः एवमस्तोपि स्पष्टाधिका
रपठितानां द्विमासेत्यादीनां मासानां योग एतत्तुल्य इति सुगमं वा

तेनु एवं गुरोर्युदितउदयास्तकालः सार्धविंश्वैर्मासैः १३।१५ शुध्य
ति तैर्मासैः पूर्वोक्तैः उदयास्तकालः युलश्चेत्तदा मधुमुखोदयोभ
वति सोपि श्चेदुत तस्तदा तत्परो भवति तैर्मासैस्तस्मादुदयास्ता
दयेन्योदयास्तकालः स्यात् अथोदयास्तयोः दिक्ज्ञानमाह॥
लघुगोल्यद्दिनादिति योग्रहः इनात् सूर्यात् लघुगोल्यगतिः अ
ल्पैः भागैर्न्यूनश्चेत्तदा सग्रहः पूर्वे पूर्वस्यां उदेति उदयं प्राप्नोति॥
यः ग्रहः सूर्यात् सूर्यापेक्षया भागैरधिकः भूरिगतिः अधिकग

७७ त्रिभेत्तदा प्रतीच्यां पश्चिमायां दिशि उदेति। यः भूयान् सूर्यादधिकभागः लघुगः स्यात्
अल्पगतिः स ग्रहः प्राच्यां पूर्वदिशि अस्तं याति। एतद्बुधशुक्रयोः अन्येषां न घटते। स्वल्प
गतित्वात्॥ २ इदं सूर्यकृतोदयास्तलक्षणं॥ अथ चंद्रशरसाधनमाह॥ प्रथमेति॥ विरा
हुचंद्रस्य दोर्ग्रहे भुजराशौ प्रथमे सति अंशाः स्वदलेन स्वार्धेन युक्ताः कार्याः सो गुलादि
कः शरः स्यात्॥ अपरे द्वितीयराशौ ये भागाः तेन गाब्धिभिः ४७ युक्ताः कार्याः शरः स्यात्
चरमे तृतीयराशौ भागा द्विलिताः ततो नगाद्रिभिः ७७ युक्ताः व्यगुविधुदिक् विराहुचंद्रो
यस्मिन् गोले तत्र दिक् शरे गुलादिकः स्यात्॥ अत्र शरानयने राशौ नामैशा न कार्याः॥
अधस्तना यथावस्थिता एव भागा ग्राह्याः॥ चंद्रस्य शरसाधनार्थं सूर्यग्रहणे कृतोति ७७

थ्यंतकालिनो चंद्रराहू तावेव स्थापितौ चंद्रः ०।५।२६।२० राहुः २।११
४१।१८ व्यगुविधुः ५।२३।४५।२ अस्य भुजः ०।६।१४।५० भुजस्य प्र
थमराशौ विद्यमानत्वात् अंशाः ६।१४।१० स्वार्धेन ३।७।२९ युक्ताः
जातः शरः ९।२२।२७ व्यगुविधोः उत्तरगोलत्वाद् उत्तरः अथ प्रका
रांतरेण शरानयनमाह नृपेति॥ व्यगुविधुः ५।२३।४५।२७ अ
स्य भुजांशाः ६।१४।५० एष्यखंडेन अनेनाद्रि गुणितं ८८।५८।२८
दशाग्निभक्तं फलं ९।५९ अनेन गतखंडयोगेन युक्तः जातो गुला।

ग्र. १३७ ३

७८ दिलादिकः २।२८।१५९ अथोदयस्तांशानार्थं कालांशानाह भास्करा
इति भास्करादयइति अ ज्ञातचंद्रात् प्रोक्तैः पूर्वाचार्यैः समया
द्याः कालांशाः निगदिताः ॥ चंद्रस्य द्वादश १२ भौमस्य नभुवः १७ बुध
स्य गुणचंद्राः १३ गुरोः भूभुवः ११ शुक्रस्य दिविभुवः सदः १९।शनिस्तिथ
यः १५ भृगुविदोः शुक्रस्य बुधयोर्वक्रिणोः वक्रगत्योः सतोस्तदा तदु
क्तकालांशाः द्विशति हीनाः एकोनाः कार्याः ॥ ॥ अथ भौमादीनां पा
तभागाह खांबुधयइति खांबुधइत्यादयः कुसुताद्भौममा ७८

रभ्य पातलवास्युः खांबुधयो ४० भौमस्य खमा २० बुधस्य भुजंगाः ८० गुरोः खां
गमिताः ६० शुक्रस्य खदस्रा २०० शनेः बुधभृग्वोः पातांशा मध्यमेनाद्रगणितो
त्पन्नेन च चलकेंद्रेण शीघ्रकेंद्रेण विहीनाः कार्याः ॥ अथ शार साधनार्थं शी
घ्रकर्णसाधनमाह कुद्वीति शके १५७४ वैशाख शुक्ल १५ पौर्णिमायां भौ
मादिनां स्पष्टक्रांतिसाधनं क्रियते तत्र भौमादीनां अंतिमशीघ्रकेंद्राणि
भौमस्य शीघ्रकेंद्रं ३।१।४।५७ बुधस्य शीघ्रकेंद्रं ११।६।२५।१७ गुरोः शी
घ्रकेंद्रं ८।२१।२०।१८ शुक्रस्य शीघ्रकेंद्रं ३।०।२१।५२ शनेः शीघ्रकेंद्रं ७।२

ग्र
७८

५०।० अथ भौमस्य शीघ्रकर्णः साध्यते॥ भौमस्य शीघ्रकेंद्रं ३।१३।५७ अस्य ३
राशितुल्यगतखंडकेनयोगः शेषम् १।१४।५७ एष्यखंडकं गुणितं ४।१९
३८ त्रिंशद्भक्तं ०।८।३९ अनेन खंडयोगेद्युक्तः ६।०।३९ एवं समकेः फलं
६।०।३९ अनेन अष्टादश १८ रहिताः जाताः भौमस्य शीघ्रकर्णः ११।५९।
२१ बुधस्य शीघ्रकेंद्रात् फलं ३५।४१ द्विगुणितं १।३।५० पंचदश १५ मध्ये
रहितं जातो बुधस्य शीघ्रकर्णः १३।५७।१० गुरोः शीघ्रकेंद्रात् फलं ७।१९।८
चतुर्गुणितं १।१४।७।१७ इदं त्रयोदश मध्ये रहितं जातो गुरोः शीघ्रकर्णः ११। ७९

३२।४३ शुक्रस्य शीघ्रकेंद्रात् फलं ६।३५।५८ इदं एकोनविंश मध्ये रहितं जातः
शुक्रस्य शीघ्रकर्णः १२।२४।२ शनेः केंद्रात् फलं ४।१७।० सप्तमांशफलं ०।३६
४२ इदं द्वादश मध्ये १२ रहितं जातः शनेः शीघ्रकर्णः ११।२३।१८ अथ भौमा
दीनां शरसाधनमाह मंदस्पष्टेति मंदस्पष्टो भौमः ५।३।८।४५ स्वपा
तेन राश्यादिना १।१५ रहितः ८।२३।३।८।४५ अस्मात् केवलात् अयनांश
नी.६ हितात् स्युः खंडांत्यादिनो क्रांतिः साध्या त्रयोविंशत्या २३ गुणिता ५९।५०।३१
३९ शीघ्रकर्णेन ११।५३।२१ भक्ता फलं ४।६।१।३८ स्वांशून्याख्यस्फुटः इत्युक्ते

त्वात्स्वचतुर्थांशेन ११।२३।२४ रहितं पातोनमंदस्पष्टस्य दक्षिणगो ८।० त्वाज्जा
तो दक्षिणो बाहुलादिकः शरः ३४।३१।१४ अत्र एतावान्विशेषः यदा भौमस्य
शीघ्रकर्णः एकादशाल्पः तदा महदंतरं पतति इति कारणात् शीघ्रकर्णेन भक्ता
त्यल्पलंबांशसंततत्वाभ्यां भक्तं पश्चात्स्वचतुर्थांशेन रहितं कार्यं एवं भौमस्य शरो
भवति एकादशाधिके शीघ्रकर्णे नांतरं ततः स्वाघ्युनाद्यैव मंदस्प
ष्टो बुधः १।५।३।१५ राश्यादिपातः ०।२०।१० अयं हर्गणोत्पन्ने शीघ्रकेंद्रेण
१।१७।१४।५० रहितः ११।२।४५।१० अनेन मंदस्पष्टो रहितः २।२।१८।५ अस्य

कांतिः २।३।५१ त्रियमाः ३ हता ४८।१९।३३ शीघ्रकर्णेन ११।५७।१० भक्ता
फलं जातः शरः ७४।३८।२४ पातोनस्य उत्तरगोलस्थत्वादुत्तरः ॥ मंदस्पष्टो गुरुः
४।१७।५७।४४ स्वपातेन राश्यादिना २।२० रहितः १।२७।५७।४४ अस्य कां
तिः १८।४९।११ त्रयाविंशतिगुण्या ४३७।५९।१३ शीघ्रकर्णेन ११।१२।४२
